# उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

(भाषा विभाग, उत्तर प्रदेश शासन के अधीन)

नया हैदराबाद, लखनऊ - 226007

वेब पोर्टलः https://upsanskritpratibhakhoj.com

## संस्कृत प्रतिभा खोज

### संस्कृत गीत प्रतियोगिता 2025 के लिए अनुशंसित गीत

नोटः- संस्कृत गीत प्रतियोगिता के प्रतिभागी जनपद, मंडल तथा राज्यस्तर की प्रतियोगिता में अनुशंसित गीतों में से किसी एक 01 सम्पूर्ण गीत का गायन करेंगें। पूर्व प्रतियोगिता में गाए गए गीत को अगली प्रतियोगिता में बदल भी सकते हैं।

**गीतों की सूची**

(1) अये प्रभाता रजनी

(2) स्वागतं शुभवन्दनम्

(3) भारतजनताऽहम्

(4) सरला सरसा संस्कृतभाषा

(5) रत्नगर्भा धरा सुस्मिता श्यामला

(6) ध्येया धरणीयम्

(7) पुनरपि भव्या भवति अयोध्या

(8) एहि एहि चन्दिर!

(9) वन्दे त्वां भूदेवीमार्य मातरम्

(10) भारतीवसंतगीतिः

(11) विलसति संस्कृतप्रतिभा

(12) संस्कृतप्रतिभान्वेषण-धन्यवाद-गानम्!

(13) सुन्दरी शरत्समागता

(14) अद्य राधिका (कज्लीगीतम्)

(15) होली गीतम्

**(1) अये प्रभाता रजनी!!**
अये प्रभाता रजनि प्राच्यामुदयति दीधितिमाली!!

वहती सगन्धसमीरोऽमन्दम्
वितरति दिशि दिशि सुममकरन्दम्
विलसति सरसि सरसिजं रम्यं म्लायति ननु शेफाली
उदयति दीधितिमाली!!

देवायतने नदति मृदङ्गः
प्रतिशाखं प्रयटति विहङ्गः
गायति पिको विकचसहकारे नृत्यति शिखी कपाली
उदयति दीधितिमाली!!

उतिष्ठ न कुरु मृषा विलम्बम्
नभसि निभालय दिनकरबिम्बम्
श्रियेप्सितः स्यात्कथं दुरापो भव रे साहसशाली
उदयति दीधितिमाली!!

पुनरायाति न विगतः कालः
कं खलु जहाति कालव्यालः
द्रुतमनुकूलय जीवनलक्ष्यं त्वं गुणगणमणिमाली
उदयति दीधितिमाली!!

चिन्तय सकृदथ भारतदेशम्
जलधित्रयनगपतिपरिवेशम्
एतद्रजसा सज्जय भालं कलिता यदङ्कपाली
उदयति दीधितिमाली!!
*लेखकः – प्रो. अभिराज राजेन्द्र मिश्रः*

**(2) स्वागतं शुभवन्दनम् ।**

प्रणतिभावैर्व्याहरामः स्वागतं शुभवन्दनम् ।

शब्दपुष्पैराचरामः श्रीमतामभिनन्दनम् ॥ ध्रुवपदम्॥

भवन्तो निरतः सदा सुरभारती समुपासने ।

अमृतकामारतावाङ्मय-पयः सागरमन्थने ।

दर्शनं भवताङ्किमपि पुण्योदयस्य निदर्शनम् ॥1॥

प्रणतिभावैर्व्याहरामः ....

अतिथि देवा वयं हृदयं सभाजनपात्रं विधाय ।

प्रीतिकुङ्कुममक्षतैर्भावैः समं तस्मिन्निधाय ।

नयनदीपैर्वयं कुर्मो मति मतां नीराजनम् ॥2॥

प्रणतिभावैर्व्याहरामः ....

यथाज्योतिष्मती जाता निशा शशिना शोभते ।

भवद्भिर्विहिता तथा धन्यासभेयं मोदते ।

उपकृता कुरुते सतां भवतां हि गुणगणकीर्तनम् ॥3॥

प्रणतिभावैर्व्याहरामः ....

**(3) भारतजनताऽहम्**

अभिमानधना विनयोपेता, शालीना भारतजनताऽहम्।

कुलिशादपि कठिना कुसुमादपि, सुकुमारा भारतजनताऽहम्।1।

निवसामि समस्ते संसारे, मन्ये च कुटुम्बं वसुन्धराम्।

प्रेयः श्रेयः च चिनोम्युभयं, सुविवेका भारतजनताऽहम् ।2।

विज्ञानधनाऽहं ज्ञानधना, साहित्यकला-सङ्गीतपरा ।

अध्यात्मसुधातटिनी-स्नानैः, परिपूता भारतजनताऽहम् ।3।

मम गीतैर्मुग्धं समं जगत्, मम नृत्यैर्मुग्धं समं जगत्।

मम काव्यैर्मुग्धं समं जगत्, रसभरिता भारतजनताऽहम्।4।

उत्सवप्रियाऽहं श्रमप्रिया, पदयात्रा - देशाटन-प्रिया ।

लोकक्रीडासक्ता वर्धेऽतिथिदेवा, भारतजनताऽहम्।5।

मैत्री मे सहजा प्रकृतिरस्ति नो दुर्बलतायाः पर्यायः ।

मित्रस्य चक्षुषा संसारं पश्यन्ती भारतजनताऽहम् ।6।

विश्वस्मिन् जगति गताहमस्मि, विश्वस्मिन् जगति सदा दृश्ये ।

विश्वस्मिन् जगति करोमि कर्म, कर्मण्या भारतजनताऽहम्।7।

*लेखकः- डॉ. रमाकान्त शुक्ल*

**(4) सरला सरसा संस्कृतभाषा**

श्रुतिरससारा स्मृतिपरिवारा पौराणिकतत्त्वनिरूपिणी

सरला सरसा संस्कृतभाषा

आदिकवेर्मुखभूधरजाता काव्यमयी रसधारा

तरलतरङ्गमिषात् प्रवहन्ती स्वात्माख्यानविचाराः

श्रुति माधुर्यैः पदलालित्यैर्जनमानसपद्मविकासिनी

सरला सरसा संस्कृत भाषा.....।

कालिदासकवितावनितायाः मधुमयलास्यविलासः
हासं मधुरं तनोति तस्याः कीर्तितनामा भासः ।
पवनाघातैर्मधुपव्रातैः लतिकायाः नृत्यविधायिनी
सरला सरसा संस्कृतभाषा..... ।

दण्डीवाणसुवन्धुविरचिता कथा सदा रमणीया
हर्षमाघभारविविरचिता कविता रसरसनीया
जयदेवकवेर्भणितिर्मधुरा श्रवणे पीयूषप्रवाहिणी
सरला सरसा संस्कृतभाषा.....।

वैयाकरणशिरोमणिपाणिनिकात्यायनः प्रणम्यः
अतिगम्भीरं कृत्वा भाष्यं पतञ्जलिर्बुधवन्द्यः
शिशुपोषिण्या लघुकौमुद्या वागब्जसुगन्धविकासिनी
सरला सरसा संस्कृतभाषा.....।

*लेखकः- डॉ. निरञ्जन मिश्रः*

**(5) रत्नगर्भा धरा सुस्मिता श्यामला**

रत्नगर्भा धरा सुस्मिता श्यामला
दिव्यतीर्थास्तटाः पर्वताः सिन्धवः ।
निर्झराः वाटिकाश्चात्र देवालयाः
भव्यमेतत्प्रियं भारतं भूतले ॥1॥

वेदशास्त्राणि साहित्यकाव्यानि वा

यत्र यच्छन्ति लोकाय सत्प्रेरणम् ।

रम्यरामायणं श्रीमहाभारतं

राष्ट्रमेतद्वरं भारतं भूतले ॥2॥

यत्र देवी सती शारदा जानकी

चानुसूया शिवा द्रौपदी पद्मिनी ।

सन्ति सर्वा इमाः वत्सलाः मातरः

शक्तियुक्तं शिवं भारतं भूतले ॥3॥

रामकृष्णौ हरी वर्धमानो जिनो

गौतमः शङ्करः पाणिनिर्नानकः ।

श्री दयानन्द साधुश्च देशेऽभवन्

देशिकानामिदं भारतं भूतले ॥4॥

भारतीयाः स्वभावेन शान्तिप्रियाः

ज्ञानविज्ञानसेवारताः कर्मठाः ।

मानवी भावना भासते संस्कृतौ

सत्यसंशोधकं भारतं भूतले ॥5॥

*लेखकः -आचार्य राधाकृष्ण मनोडी*

**(6) ध्येया धरणीयम्**

जननीयम्, मम जननीयम्, भारतधरणीयम्

पावनचरितेयम्, श्रितजनवरदेयम्

सुरनुतचरणेयम् ।। जननीयम्।।

वेदबृंहिता शास्त्रमण्डिता दर्शनसम्पदियम्

ऋषिमुनिमहिता कविकुलगीता भूतलरत्नमिदम् ।

वसुदा वसुधा सर्वसवित्री शर्मदभूमिरियम्

पुण्यधरित्री ज्ञानशेवधिस्सकलैर्वन्द्येयम्।।

जननीयम् .....

निरुपमसत्त्वा विविधगुणाढ्या संस्कृतिसारेयम्

सरससरिद्भिस्तुङ्गभूधरैर्भूषितकायेयम् ।

सस्यसमृद्धा सुभगनिसर्गा न्यक्कृतनाकेयम्

बाहुबलेड्या बहुबलधर्त्री धर्मविधात्रीयम्।।

जननीयम्....

निर्मलचित्तैस्तन्वा विभवैस्सदा हि सेव्येयम्

हृदि धरणीया सुतैस्समस्तैरनन्यशरणेयम् ।

भगिनि, भ्रातः, सुहृद्बान्धवाः, पूज्या मातेयम्

रात्रिन्दिवमप्यविरतमनसा ध्येया धरणीयम्।।

जननीयम्.....

*लेखकः- जनार्दन हेगडे*

**(7) पुनरपि भव्या भवति अयोध्या**

पुनरपि भव्या भवति अयोध्या
राममन्दिरं भव्यतरम्
जगज्जननी सीताऽऽयाति
पश्य तया सह रामवरम् ।।

भव्यमन्दिरे रामदर्शनं
रामदर्शनं कणे-कणे।
छिन्नं सर्वं जगद्वन्धनं
रामस्मरणं क्षणे-क्षणे।।

तस्य लीलया सकलं भुवनं
सृष्टिः सर्वा तस्य कला।
जयतु अयोध्या नगरी भव्या
जयतु जयतु श्रीरामलला।।

*लेखकः- शशिपालशर्मा 'बालमित्र'*

**(8) एहि एहि चन्दिर**

एहि एहि चन्दिर
श्वेतकिरण ! सुन्दर !
नीलगगनमन्दिर !
सकलजनमनोहर !

तारकेश ! गिरिगुहासु

किरणजालमातनु

वितर सस्य-तरु-लतासु

किरणजालमातनु

वितर सस्य-तरु-लातसु

रसविशेषमादरात् ॥

मातरः प्रदर्शनेन

नन्दयन्ति बालकान् ।

पक्षिणश्च तव करेण

तोषयन्ति शावकान् ॥

*लेखकः- - गु. गणपय्यहोळळः*

**(09) वन्दे त्वां भूदेवीमार्य मातरम्**

वन्दे त्वां भूदेवीमार्य मातरं

जयतु जयतु पदयुगलं ते निरन्तरम् ॥ ध्रुवम्॥

शुभ्र-शरच्चन्द्र-युक्त-चारुयामिनीं

विकसित-नव-कुसुम-मृदुल-दामशोभिनीं

मन्दस्मितयुक्त-वदन-मधुरभाषिणीं

सुजलां सुफलां सरलां

शिववरदां चिरसुखदां

मुकुलरदामार्य मातरम् ॥ १॥

अगणितसंतानवृन्द-कण्ठनादिनीं

अमितभुजां धृतधरिणीं तनयतारिणीं

हिमनगजां स्वाभिमान-बुद्धिदायिनीं

कमलाम् अमलाम् अतुलां

रिपु-दलिनीं बलकरणीं

धृतनलिनीं राष्ट्रमातरम् ॥ २॥  वन्दे त्वां..

धर्मस्त्वं शर्म त्वं त्वं यशोबलं

शक्तिस्त्वं भक्तिस्त्वं कर्म चाखिलं

प्रतिसदनं प्रतिमा ते त्वं महाबलं

धरणीं भरणीं जननीं

कविप्रतिभां नतसुलभां

जगदम्बां देशमातरम् ॥ ३॥ वन्दे त्वां..

**(10) भारतीवसंतगीतिः**

निनादय नवीनामये वाणी वीणाम् ।

मृदुं गाय गीतिं ललित नीति लीनाम् ॥

मधुर - मञ्जरी- पिञ्जरीभूत- माला:

वसन्ते लसन्तीह सरसा रसाला:

कलापा कलित-कोकिला-काकलीनाम्
निनादय नवीनामये वाणी वीणाम् ॥

वहति मन्द-मन्दं समीरे सनीरे
कलिन्दात्मजाया: सवानीर-तीरे
नतां पंक्तिमालोक्य मधुमाधवीनाम्
निनादय नवीनामये वाणी वीणाम् ॥

चलितपल्लवे पादपे पुष्पपुंजे,
मलयमारुतोच्चुम्बिते मञ्जुकुंजे
स्वनन्तीन्ततिम्प्रेक्ष्य मलिनामलीनाम्।
निनादय नवीनामये वाणि ! वीणाम्।।

लतानां नितान्तं सुमं शान्तिशीलम्,
चलेदुच्छलेत्कान्तसलिलं सलीलम्-
तवाकर्ण्य वाणीमदीनां नदीनाम्।
निनादय नवीनामये वाणि  वीणाम्।।

*लेखक-  जानकीवल्लभ शास्त्री*

(11) **विलसति संस्कृतप्रतिभा**

विलसति संस्कृतप्रतिभा
विलसतिसंस्कृतप्रतिभा
संस्कृतप्रतिभान्वेषणलग्ना भव्या  मित्र! मनोज्ञा

प्रेरयन्ति सद्गुरव: शिष्यान् नितरां गन्तुं विज्ञा:।
दिशि दिशि विद्यालयतो वटवश्चलितास्सन्ति श्रुताभा:
विलसति संस्कृतप्रतिभा
विलसति  संस्कृतप्रतिभा

पश्य पश्य सज्ज्ञानवनेऽस्मिन् गुञ्जति प्रतिभागानम्
अहो वटूनां वाणी कुरुते बाणभट्टसम्मानम्।
सुखिनो दृष्ट्वा हन्त पूर्वजा मोदन्ते दिव्याभा:
विलसति संस्कृतप्रतिभा
विलसति संस्कृतप्रतिभा

श्लोकानामुच्चारणमेतद् हरते चेतोऽस्माकम्
ब्रुवते गुरवो वाहवाह इति प्रेरकवचनं साकम्।
अन्नंभट्टामरपाणिनिरचनानां हन्त जिताभा
विलसति संस्कृतप्रतिभा
विलसति संस्कृतप्रतिभा

व्यासगणेशविरचिता भाषा जीवति लेखे वन्द्या
मुदिता वयं भवामो दृष्ट्वा प्रतिभामेषां धन्या
संस्कृतिसंस्कृतरक्षणहेतोर्विलसतु राष्ट्रनवाभा
विलसति संस्कृतप्रतिभा
विलसति संस्कृतप्रतिभा

- अरविन्दतिवारी

**(12) संस्कृतप्रतिभान्वेषण-धन्यवाद-गानम्!!**

समादरणीय हे श्रीमन्! वदामो धन्यवादं ते।

कृतज्ञा योजका: प्रीत्या वदामो धन्यवादं ते।।१

सुप्रतिभान्वेषणं सफलं वयं मन्यामहे  मतिमन्!

उपस्थित्या स्वसंस्थाने वदामो धन्यवादं ते।। २

गुरुर्वा यो महानभिभावक: प्रेम्णा प्रियच्छात्र:।

विमलनिष्ठां प्रदर्शितवान् वदामो धन्यवादं ते।। ३

स्वसंस्कृतवर्द्धने धीमन्! प्रयासोऽयं सदा श्लाघ्य:।

समर्थनयोगदानार्थं वदामो धन्यवादं ते।। ४

असीमप्रेमभावो दर्शनीयो मान्य! प्रतिभायाम्।

मनो नोऽचोरयत्त्वरितं वदामो धन्यवादं ते।। ५

सुयोगं सम्प्रदायैतद् विहितवान् योजनं सुफलम्।

वटो! प्रतिभागितां कृतवान् वदामो धन्यवादं ते।। ६

गिरामायोजनेऽस्मिन् य: सदोत्थ:  संस्कृतोन्नतये।

विनयकुसुमैर्मुहुर्मुदिता वदामो धन्यवादं ते।। ७

***अरविन्दतिवारी

**(13) सुन्दरी शरत्समागता**

एहि एहि स्वागतं विधेहि सौभगं प्रदेहि

सुन्दरी शरत्समागता।।

मन्दमन्दपावनप्रसूनगन्धसंकुलः

स्पर्शसौख्यदायकः प्रवाति शीतलोऽनिलः।

निर्वृतिप्रदायिनी समस्ततापहारिणी

श्रेयसी शरत्समागता।।1।।

नष्टसर्वदूषणा विधौतपङ्कनिर्मला

स्वच्छवारिवाहिनी पयस्विनी स्फुरज्जला

हृत्प्रसादिनी विनष्टसर्वचित्तकल्मषा

पावनी शरत्समागता।। 2।।

संयमेन शान्तकच्छकोद्वहत्सरोघटा

कृच्छ्रमेव बिभ्रती स्खलत्सरिच्छिरःपटा

ग्रामबालिकेव सम्भ्रमेण सृतिविहारिणी

षोडशी शरत्समागता।।3।।

स्वर्णशालिभूषणा प्रवृद्धकासभासुरा

मन्थरैः पदक्रमैश्च हंसनादनूपुरा

लज्जया प्रसह्य भूरुहैर्हि गुण्ठितानना

मुग्धिका शरत्समागता।।4।।

चन्द्रिकाम्बरा निरभ्रशुभ्रकेशकुन्तला

शीर्षके हि चन्द्रबिन्दुमण्डितेव सत्कला

चन्दनाङ्किताङ्वीतगरागसाधिकानिभा

तापसी शरत्समागता।।5।।

*लेखिका- डॉ. नवलता*

**(14) अद्य राधिका (कज्लीगीतम्)**

अद्य राधिका मुदा मया विलोकिता,

सखीजनेन सेविता दिने।

सखी च कृष्णरूपगा विभाति रासनर्तने।

तथा प्रसादिता लतागृहेऽनुधाविता ।।

सखीजनेन ....।।१।।

प्रियाः प्रसूनपुञ्जमध्यगं हसन्ति मोहनम्

सखे ! श्रिया यथा हरेर्मुखं विलोकितं

स्वभावनिर्मला मुदाऽयने ।।

अद्य राधिका ....।॥२॥

नन्दनन्दनं शुभं च कामरूपबल्लभं

प्रिया च राधिकाऽनुधाविता च मानिता ।। सखी०।

कृष्ण कृष्ण प्राणवल्लभ प्रिया त्वया निवारिता-

मया विचारितं त्वयाप्रिया सुधारिता।

सखीजनेन ....।।३।।

*लेखकः- आचार्य लालमणि पाण्डेयः*

**(15) होली-गीतम्**

यमुना-पुलिने क्रीडति श्यामो होलायाम्।

इतो याति राधा सखिभिः सह

तत आयाति सबलरामो होलायाम्।।

यमुना.....

सुन्दरकरधृत-साभ्रगुलालः

कुङ्कुमकेशर-रञ्जितभालः

युवतिजनैः सहितो गोपालः

जयति जयति राधे श्यामो होलायाम्।

यमुना.....

पीतवसनधारी वनमाली

राधायाः शाटी हरताली

चलति द्वयोः तुल्या पिचकाली

वर्षत्यानन्द ग्रामो होलायाम्।।

यमुना.....

*लेखकः- काली प्रसाद शास्त्री*